सह नाववतु-- इति शान्तिः ।

वज्रपञ्जरेण भस्मधारणं कुर्यात् । वामकरे भस्म गृहीत्वा सद्यो-जातमिति पञ्चब्रह्ममन्त्रः । त्रियम्बकं जातवेदसे गायत्र्या मानस्तोकैरभिमन्त्र्य मूलेन सप्तवारमभिमन्त्र्य श्रीविद्येयं शिरसि । ऐं वद वद वाग्वादिनि ह्स्त्रैः क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरु । हसकलरी ओं मोक्षं कुरु कुरु । ह्सौः इति मुखे । ओं ओं नमो भगवति ज्वालामालिनि देवदेवि सर्वज्ञानं हारिके

जातवेदसि ज्वलन्ति ज्वलन्ति प्रज्वल प्रज्वल ह्रां ह्रीं ह्रूं र र र र ज्वाला-मालिनि हुं फट् स्वाहा इति हृदये। जलवासिन्यै नमो नाभौ। ह्रीं वह्निवासिन्यै नमो गुह्ये। ओं सह . . . . नाभ्यादिजान्वन्तम्। ओं ह्रीं श्रीं पशु हुं फट् स्वाहा जान्वादिपादपर्यन्तम्। ओं ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर . . . . . रूप तट तट चट चट प्रचट प्रचट कह कह वम वम बन्धय बन्धय घातय घातय हुं फट् स्वाहा इत्यघोरेण शिरसि। ओं वैष्णव्यै नमो हृदये। पुनः अघोरेण पृष्ठे। पुनः सुदर्शनेन जान्वादिनाभ्यन्तम्। पुनः पाशुपतेन पादादिजान्वन्तम्। ह्सौः अ अं क्षं स्हौः . . ओं ह्रीं क्लीं क्ष्रौं श्रीं।

उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्॥

श्रीं क्ष्रौं श्रीं ह्रीं ओं इति दक्षिणबाहौ। ओं क्षां ओं नमो भगवते नारसिंहाय ज्वालामालिने तीक्ष्णदंष्ट्राग्निनेत्राय सर्वरक्षोघ्नाय सर्वज्वरविनाशाय सर्वभूतविनाशाय दह दह पच पच रक्ष रक्ष हुं फट् स्वाहा इति वामबाहौ। उत्तिष्ठ पुरुष हरितपिङ्गळ लोहिताक्ष देहि मे दापय स्वाहा। ओं ह्रीं दुं उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितम्। यदि शक्यमशक्यं वा ते भगवति शमय शमय स्वाहा।

मृत्योस्तुल्यं त्रिलोकीं ग्रसितुमतिरसान्निस्सृता किं नु जिह्वा
किं वा कृष्णाङ्घ्रिपद्मस्तुतिभिररुणिता विष्णुपद्याः पदव्यः।
प्राप्ताः सन्ध्याः स्मरारेः स्वयमुत नुतिभिस्तिस्र इत्यूह्यमानाः
देवैर्देव्याश्शिशूलक्षतमहिषजुषो रक्तधारा जयन्ति॥

इति बडबानलदुर्गामृत्योस्तुल्यवनदुर्गाभिः सर्वाङ्गमुद्धूळयेत्। ततः शेषभस्मनि जलं निक्षिप्य त्रिपुण्ड्रधारणं कुर्यात्।

एता एव महाविद्या विभूतेरभिधारणे ।
कथिताः परमेशानि सतां पूर्वतराघहाः ॥
वज्रपञ्जरनाम्नैव यः कुर्याद्भस्मधारणम् ।
स सर्वभयनिर्मुक्तः साक्षाच्छिवमयो भवेत् ।
एतानि तानि श्रीमन्त्रपवित्रे यानि भस्मनि ॥

दग्धकामाङ्गविभूतित्रैपुण्ड्रितानि कथितानि ललाटपट्टे लोपयन्ति दैवलिखितानि दुरक्षराणि ।

इति वज्रपञ्जरोपनिषत् समाप्ता
